No. १२६४

Title ज्ञान द्वय कारणता विचार:

Author ---×---

Extent ९ Age ---×---

Subject न्याय शास्त्र म्र.

ज्ञानद्वयकारणताविचारः

१२६४

निरूपणं लद्व स्वस्वरूप प्रा माएव प्रकार का ज्ञान जो नवो शाव:

ॐ श्रीगणपतये नमः॥ अनुमितिं प्रति व्याप्तिविशिष्टहेतुमत्तानिश्चयः कारणमिति नैयायिकाः॥ तत्र मीमांसकम
तानुयायिनः। अनुमितिं प्रति विशिष्टपरामर्शत्वेन हेतुत्वे हेतुताघटकीभूतानन्यथासिद्धत्वनियतपूर्व
वृत्तित्वलक्षणस्योपदर्शितविशिष्टज्ञानधर्मावच्छेदेन कल्पने गौरवात् तदपेक्षया नियतपूर्ववृत्तित्वेनो
भयवादिसिद्धव्याप्यतावच्छेदकावच्छिन्नविशेष्यकव्याप्तिप्रकारकज्ञानत्वावच्छिन्नं यच्च पक्षविशेष्यकहेतु
प्रकारकज्ञानत्वावच्छिन्नं तयोर्हेतुत्वकल्पनमेव सम्यक् लघुत्वात्तु उभयधर्मावच्छेदेनानन्यथासिद्धत्वरूपकारणता
वच्छेदकघटकैकदलस्य कल्पनेन मन्मते लाघवसंभवात्। अनुमितिं प्रति व्याप्यतावच्छेदकावच्छिन्नविशे
ष्यकव्याप्तिप्रकारकज्ञानत्वपक्षविशेष्यकहेतुप्रकारकज्ञानत्वाभ्यां कार्यकारणभावकल्पनेऽप्यालोको वह्निव्याप्यो
धूमवानयं पर्वत इत्यादिज्ञानात्पर्वतो वह्निमानित्यनुमित्युपपत्तिरिति न शंकनीयं। यतो न वयं सामान्यतो
ऽनुमितित्वावच्छिन्नं प्रति उपदर्शितसामान्यधर्मद्वयाभ्यां हेतुतामुररीकुर्मः। किंतु विशिष्य पर्वतोद्देश्यकवह्नि
विधेयकानुमितिं प्रति धूमत्वाद्यवच्छिन्नविशेष्यकव्याप्तिप्रकारकज्ञानत्वेन पर्वतत्वावच्छिन्नविशेष्य ना
कधूमत्वाद्यवच्छिन्नप्रकारताशालिज्ञानत्वेन च तथा तत्र च नोपदर्शितापत्तिगंधोऽपि। न च पर्वतोद्देश्यक
वह्निविधेयकानुमितित्वावच्छिन्नं प्रति उपदर्शितविशेषधर्मद्वयाभ्यां हेतुत्वकल्पने धूमत्वावच्छिन्नविशेष्य
तावह्निनिरूपितव्याप्तिप्रकारतयोर्विशेष्यविशेषणभावेन एवं पर्वतविशेष्यत्वधूमप्रकारत्वयोर्विशेष्य

२ नहेतुत्ववादिमते धर्मविशेष्यकव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नपर्वतविशेष्यकधर्मप्रकारकनिश्चयत्वावच्छिन्नयोः पर्वतो वह्निमानित्यनुमिति २

विशेषणाभावेन च विनिगमनाविरहेण कार्यकारणभावबाहुल्यापत्तेः गौरवमिति वाच्यं। नैयायिकमतेपि व्याप्तिप्रकारक
धर्मप्रकारकत्वपक्षविशेष्यकत्वादीनां विशेष्यविशेषणभावेन विनिगमनाविरहात्कारणभावबाहुल्यस्यावश्य
कतया मन्मते दर्शितगौरवानवकाशादित्याहुः। अत्रेदं विचारयामः। यदि विशिष्टपरामर्शत्वे नियतपूर्ववर्तित्वं सिद्धं त
देव उपदर्शितलाघवसंभवो मीमांसकमते तदेव न वह्निव्याप्यधूमालोकवान्पर्वत इत्यत्र तयोरभावात्। न च तत्र
तयोरभावेपि वह्निव्याप्यधूमवान्पर्वत इत्यत्र तदुभयधर्मावच्छिन्नस्य तत्र सत्त्वात् तत्रैव तदुभयधर्माव
च्छिन्नयोर्नियतपूर्ववर्तित्वस्य नैयायिकाभ्युपगततया मीमांसकमते उपदर्शितलाघवसंभव इति वा
च्यं। स्थलविशेषे तदुभयधर्मावच्छिन्नयोर्नियतपूर्ववर्तित्वस्योपगततत्वेपि तत्पाचे तदुभयरूपेणा
नुमितिं प्रति हेतुत्वं कल्प्यत इति स्थलविशेषे नैयायिकमतेपि विशिष्टपरामर्शत्वावच्छिन्नेऽनुमितिनिय
तपूर्ववर्तित्वस्य क्लृप्ततया तेन रूपेणानुमितिं प्रति हेतुत्वे बाधकाभावात्। न च विनिगमनाविरहा
त्तेन रूपेणापि हेतुत्वसिद्धिरिति वाच्यं। तदुभयधर्मावच्छेदेनानन्यथासिद्धत्वकल्पनापेक्षया विशिष्ट
निश्चयत्वरूपैकधर्मावच्छिन्नेऽनन्यथासिद्धत्वकल्पने लाघवस्यातिस्फुटत्वात्। यद्यपि पर्वतोद्देश्य
कवह्निविधेयकानुमितिं प्रति वह्निव्याप्यधर्मप्रकारकपर्वतविशेष्यकज्ञानत्वेन हेतुत्ववादिमते व्याप्यां
शे संशयात्मतथाविधज्ञानसत्त्वेऽनुमित्यापत्तिः। एवं धर्मांशे संशयात्मकतथाविधज्ञानसत्त्वेपि।

रू

तथा च तद्वारणाय तादृशानुमितिं प्रति वह्निव्याप्याभावाप्रकारकत्वे सति धूमाभावाप्रकारकं यद्वह्निव्याप्य
धूमप्रकारकज्ञानं तस्यैव तथाविधानुमितिं प्रति हेतुत्वे नैयायिकैः स्वीकरणीयमिति तन्मते व्याप्याभा
वाप्रकारकत्व धूमाभावाप्रकारकत्वयोरेकत्रनिवेशे तयोरितरपदार्थैः सह विशेष्यविशेषणभावे विनिग
मनाविरहात्कार्यकारणभावबाहुल्यं कारणतावच्छेदकगौरवं च ॥ मीमांसकमते तु वह्नि[illegible] व्याप्याभावा
प्रकारकत्वस्य वह्निव्याप्तिज्ञानजनकतावच्छेदककोटौ धूमाभावाप्रकारकत्वस्य च धूमज्ञाननिष्ठ
जनकतावच्छेदककोटौ निवेशनीयतया तयोरेकत्रानिवेशप्रयुक्तगौरवं दूरपराहतं न च तदुभयनि
ष्ठजनकतावच्छेदककोटौ दर्शितरीत्या वह्निव्याप्याभावाप्रकारकत्व धूमाभावाप्रकारकत्वयोर्निवेशः
उत वैपरीत्येनेत्यत्र विनिगमनाविरहात्कार्यकारणभावबाहुल्यं मीमांसकमते गौरवमिति वाच्यम् ॥ वै
परीत्येन तत्र तयोर्निवेशे यत्र धूमवान्पर्वत इति ज्ञानमयं च धूमो वह्निव्याप्यो न वेति संशयः तत्र प
र्वतो वह्निमानित्यनुमित्यापत्तेः ॥ एवं यत्र वह्निव्याप्यो धूम इति ज्ञानमयं च धूमवान्न वा पर्वत इ
ति संशयस्तत्रापि तथाविधानुमित्यापत्तेरिति चेन्न । तादृशानुमितिं प्रति वह्निव्याप्यावच्छिन्नधू
मप्रकारतानिरूपिताविशिष्टवैशिष्ट्यविषयतात्वेन निरूपितप्रकृतत्वावच्छिन्नविशेष्यताशालिनिश्चय
त्वेन हेतुत्वकल्पनान्नैयायिकमते व्याप्यांशे निश्चयत्वानिवेशेनोपदर्शितगौरवाभावात् ॥ यत्तु

तेन रूपेण हेतुत्वकल्पने व्याप्यंशे निश्चयत्वानिवेशे वह्निव्याप्यो धूम इति विशेषणतावच्छेदकप्रकारकनिर्णय
काले वह्निव्याप्यंशे संशयाभाव एव बीजं तच्च न संभवति । तादृशनिर्णयकाले वह्निव्याप्यभावप्रकारकं ज्ञा
नं जायतामिति तादृशसत्त्वे वह्निव्याप्यंशे संशयात्मकतथाविधविशिष्टवैशिष्ट्यावगाहितासालि वह्निव्याप्य
धूमप्रकारकपर्वतविशेष्यकज्ञानोत्पत्तौ बाधकाभावात् ॥ संशयं प्रति तद्विषयकेच्छाविरहविशिष्टनि
र्णयस्यैव प्रतिबन्धकतया तादृशेच्छाविरहविशिष्टनिर्णयाभावकूटस्य कारणत्वादिति तथाविधसंशयोत्त
रमनुमित्यापत्तिवारणाय व्याप्यंशे निश्चयत्वं निवेश्यैवोपदर्शितकार्यकारणभावस्य नैयायिकनये क
ल्पनीयतया पूर्वोपदर्शितगौरवं तन्नये दुष्परिहरमेव न च तादृशज्ञानस्य तदा आहार्यतया न
तस्मादनुमित्यापत्तिः । आहार्यपरामर्शानन्तरमनुमित्यापत्तिवारणायानुमितिजनकतावच्छेदको
टौ ऽनाहार्यत्वनिवेशस्यावश्यकत्वादिति वाच्यं ॥ अनुमितिजनकतावच्छेदककोटिप्रविष्टाना
हार्यत्वस्याननुगततया निर्वचनाशक्यत्वात् न तत्तद्व्यक्तिविश्रान्ततया न तथाविधतत्तद्व्यक्तित्वा
वच्छिन्नभेदकूटस्यानुमितिजनकतावच्छेदककोटौ निवेशनमपेक्ष्य व्याप्यंशे निश्चयत्वनि
वेशस्यैव तर्कसहकृतत्वात् ॥ तथा चोपदर्शितगौरवं नैयायिकमते दुरुद्धरमेति तत्त्वं ॥ विशिष्ट
वैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकज्ञानत्वेन कार्यका[illegible]लवतित यातद्भावप्रका

रकज्ञानाभावत्वेन चेदेतत्तस्य बहुधा प्रतिबन्धेन व्यवस्थापनीयं तथा तत्र विशेषणतावच्छेदकप्रकार
कनिर्णयत्वेन हेतुत्वाभावे नोदर्शितसंदेहे विशिष्टवैशिष्ट्यविषयताया अभावात् तदा कार्यका
ले विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावासत्त्वात्तस्माद्व्याप्तिविशिष्टवैशिष्ट्यविषय
तायाऽनुमितिजनकतावच्छेदकत्वे तज्जनकतावच्छेदककोटौ व्याप्त्यंशे निश्चयत्वाप्रवेशा
त्। तत्र तन्निवेशनप्रयुक्तगौरवं नैयायिकनये न शंकास्पदमावहतीति॥ केचित्तु मीमांसकप्रदर्शि
तरीत्या व्याप्त्यंशे निश्चयत्वानिवेशप्रयुक्तगौरवं विशिष्टपरामर्शत्वेन हेतुत्ववादिमतेऽत
थापि व्याप्त्यंशेऽप्रामाण्यज्ञानास्य धर्मांशेऽप्रामाण्यज्ञानस्य चैव च निवेशे तत्प्रयुक्तविशेष्यविशे
षणभावे विनिगमनाविरहेण कार्यकारणभावद्वये द्वैरवच्छेदकगौरवस्य चतुष्पात्रित्वमेव मीमांस
कमते तु स्वाश्रयस्वीयाप्रमाण्यज्ञानाभावस्य स्वस्वनिष्ठजनकतावच्छेदककोटौ निवेशनेन तयो
रेवज्ञाननिवेशे द्विशेषणाभावप्रयुक्तगौरवस्यानवकाश इत्याहुः तदपि न विचारसहं॥ विशेष्यवि
शेषणभावे विनिगमनाविरहेण कार्यकारणभावद्वैविध्ये यथाऽप्रामाण्यज्ञानाभावस्यानुमितिजन
कतावच्छेदककोटौ निवेशात् न वाऽप्रामाण्यज्ञानाभावस्यानुमितिजनकतावच्छेदककोटाव
निवेशोऽप्रामाण्यज्ञानास्कन्दितपरामर्शकालेऽनुमित्यापत्तिरिति वाच्यं॥ अनुमितिं प्रति अप्रामा

माण्यज्ञानाभावस्य हेतुत्वोपगमात्॥ न च जनकतासंबंधेनानुमितिं प्रति समवायसंबंधघटितधर्मिसमाना
धिकरणसंबंधावच्छिन्नप्रतियोगिताकप्रामाण्यज्ञानाभावस्य हेतुत्वे क्रमोत्पन्नधूमपरामर्शद्वय
काले एकतरपरामर्शेऽप्रामाण्यज्ञाने सत्वेऽनुमित्यनुपपत्तिर्दुरुद्धरैवेति वाच्यं॥ स्वाव्यवहित
पूर्वक्षणावच्छिन्नत्वादिविशिष्टतासंबंधावच्छिन्नप्रतियोगिताकप्रमाण्यज्ञानाभाववत्तोता
दृशसंबंधेनानुमितिं प्रति विशिष्टतासंबंधावच्छिन्नप्रतियोगिताकप्रामाण्यज्ञानाभावस्य हे
तुत्वेनोक्तानुपपत्तेरभावात्॥ न च तथापि विशिष्टाप्रामाण्यज्ञानसत्वे धूमपरामर्शसत्वे समवा
यसंबंधेन धूमपरामर्शीयप्रकारेण वह्न्यात्मसमवायसंबंधेनात्मन्यनुमित्यापत्तिः समवा
येन धूमपरामर्शेन फलजननेऽविशिष्टतासंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभाव
स्य सहकारित्वांगीकारेऽपि तु तस्यापि घटपटादौ सत्वेनोक्तापत्तेर्वारणमशक्यमेवेति वाच्यं॥ धूम
परामर्शवृत्तिसामानाधिकरण्येनानुमितिं प्रति तादात्म्यसंबंधेन तस्य हेतुत्वकल्पनेनोक्तस्थ
ले समवायेनोपदर्शितरीत्याऽनुमित्यापत्तेरसंभवात्॥ न च तथापि तादृशधूमपरामर्शवृत्तिसा
मानाधिकरण्यसंबंधेनानुमित्यापत्तिर्दुर्वारैवेति वाच्यं॥ तादृशसंबंधेनानुमितिं प्रति विषयता
तादात्म्योभयघटितसामानाधिकरण्यसंबंधेनाप्रामाण्यग्रहाभावविशिष्टोद्बोधकधूमपरामर्श

४ कृ घटितसामग्र्या नियामकत्वांशेऽसिद्धेः । तथा च कृ उपदर्शिताप्रामाण्यज्ञानाभावानामेकत्रनिवेशान
प्रयुक्तगौरवं नैयायिकमत इति न विरुद्धः । यदपि कारणत्वस्यातिरिक्तत्वमङ्गीकर्तृ ...नव्यानां
५ मतमवलंब्य विनिगमनाविरहेणोपदर्शितोऽन्यथारूपेण हेतुत्वमपि संभवतीत्याशङ्कनं तदपि न ॥ म्र खंडे का१२
वह्निव्याप्यधूमवान्पर्वत इति विशिष्टपरामर्शकाले इदं ज्ञानं वह्निव्याप्याभाववदिति वह्निव्या
प्यप्रकारकमित्यप्रामाण्यज्ञानदशायां पर्वतो वह्निमानित्यनुमित्याप्रतिवारणापत्तादृशोऽन्यथारू
पेण हेतुत्ववादिना तादृशाप्रामाण्यज्ञानाभावो धूमप्रकारकपर्वतविशेष्यकज्ञानत्वावच्छिन्न
निष्ठानुमितिजनकतावच्छेदककोटौ व...रूपं निवेशनीयः तथा च धूमवान्पर्वतो वह्निव्याप्यो
धूम इति ज्ञानसत्त्वे धूमवान्पर्वत इति ज्ञानं वह्निव्याप्याभाववदिति वह्निव्याप्यप्रकारकमित्य
प्रामाण्यग्रहकाले पर्वतो वह्निमानित्यनुमित्यनुदयापत्तेः । एवं वह्निव्याप्याभाववान्पर्वतो व
ह्निव्याप्यधूमवान् इति संदेहकालेऽनुमित्याप्रतिवारणाय वह्निव्याप्यत्वावच्छिन्नप्रतियो
गिताकाभावप्रकारकत्वं धूमप्रकारकपर्वतविशेष्यकज्ञाननिष्ठजनकतावच्छेदककोटौ
तपाव तेनावश्यं निवेशनीयं वह्निव्याप्यो धूमः वह्निव्याप्याभाववान्पर्वतो धूमवान्पर्वतो धूम
वानितिज्ञानसत्त्वेऽप्यनुमित्यनुपपत्तेः तद्घटितत्वाच्चेति विशिष्टपरामर्शहेतुत्ववादिमतेऽप्येवं साम्य
गालोचनमाम्नः ॥ परे तु ॥ पर्वतविशेष्यकधूमप्रकारकज्ञानानिष्ठानुमितिजनकतावच्छेदककोटौ अ

४

दर्शिताप्रामाण्यज्ञानाभावस्य वह्निव्याप्यत्वावच्छिन्नप्रतियोगिताकाभावाप्रकारकत्वस्य चानिवेशेऽपि मीमांसकमते
उपदर्शितोभयस्य लेदत्तापत्तिदोषानवकाशात् ॥ यदि हि तादृशाभावनाधिकरणे संबन्धावच्छिन्नप्रतियो
गिताकोपदर्शिताप्रमाण्यज्ञानाभावस्य स्वरूपसंबन्धावच्छिन्नप्रतियोगिकवह्निव्याप्यत्वावच्छिन्नप्रतियो
गिताकाभावप्रकारकत्वाभावस्य च चेत्सामानाधिकरण्यसंबन्धेन तथाविधाधिकरणे नावच्छेदककोटिप्रवे
२ शः तदा उपदर्शितापत्तिः संभवति तदेव न किन्तु व्याप्यत्वावच्छिन्नप्रतियोगिताकाभाववद्विशेष्यकत्वा
वच्छिन्नत्वप्रकारतानिरूपिता या व्याप्यत्वावच्छिन्नप्रकारतानिष्ठविशेष्यतातदवच्छेदकावच्छिन्नत्वसं
बन्धावच्छिन्नप्रतियोगिताक तथाविधप्रामाण्यज्ञानाभावः एवं स्वावच्छेदकव्याप्यत्वावच्छिन्नत्व स्वनि
रूपकज्ञाननिरूपितत्वोभयसंबन्धावच्छिन्ना या पर्वतविशेष्यतानिरूपिताभावप्रकारतानिरूपि
तप्रतियोगितासंबन्धावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारतानिष्ठावच्छेदकतानिरूपितप्रतियोगिता
कभेदस्यानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकीभूतधूमप्रकारतायां निवेशे तथा
चोपदर्शितज्ञानद्वयकाले धूमज्ञाने वह्निव्याप्याभाववत्ताविरहव्याप्यप्रकारकनिर्णयज्ञानमित्यप्रामा
ण्यग्रहकाले एवं वह्निव्याप्यो धूमः वह्निव्याप्याभाववान्नवेति धूमकोटिकसंशयज्ञानकाले चानुमित्य
नुपपत्तिः ॥ तादृशाज्ञानीय धूमप्रकारतायां व्याप्यत्वावच्छिन्नत्वविरहेण तथाविधसंबन्धावच्छिन्नप्रति

न्या॰ दि

५

5

योगितावच्छेदकताकोपदर्शितभेदस्योपदर्शितसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य च स
त्वेनोपदर्शितानुमितिजनकतावच्छेदकावच्छिन्नस्यासत्त्वादित्याहुः तदसमीचीनमाभाति त
त्पाहि॥ धर्मप्रकारकज्ञाननिष्ठजनकतावच्छेदककोटौ धर्मप्रकारताकोपदर्शितसंबंधावच्छिन्नप्रति
योगिताकोक्ताप्रामाण्यज्ञानाभावस्य निवेशे धर्मवान्न वेति इति ज्ञाने उत्कटान्तरीये तथाविधाप्रा
माण्यज्ञानसत्त्वेऽनुमित्यनुपपत्तेः॥ न च तदुत्कटीयत्वं निवेश्य कार्यकारणभावकल्पनान्नापत्ति
रिति वाच्यं उत्कटभेदेनानंतकार्यकारणभावकल्पने गौरवापत्तेः॥ न च तथापि स्वीयव्याप्य
प्रकारतानिष्ठविशेष्यतावच्छेदकावच्छिन्नत्वस्वसमानाधिकरणज्ञाननिरूपितत्वोभयसंबं
धावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावस्य जनकतावच्छेदकोक्तधर्मप्रकारतायां निवे
शान्नोत्कटांतरीयाप्रामाण्यज्ञानसमाहारानुपपत्तिः॥ एकोत्कटीयज्ञानीयधर्मप्रकारतायामु
त्कटांतरीयाप्रामाण्यज्ञानसमानाधिकरणज्ञाननिरूपितत्वाभावात् ज्ञानभेदेन विषयताभेदा
गीकारादिति वाच्यं॥ एकोत्कटस्याप्रामाण्यज्ञानानास्कंदितधर्मप्रकारकज्ञानसत्त्वे उत्कटांतरीयस्य त
दनास्कंदितधर्मप्रकारकज्ञानदशायां उत्कटांतरस्यानुमित्यनुदयापत्तेः॥ ज्ञानभेदेन विषयता
भेदे मानाभावेनोत्कटांतरीयज्ञानीयधर्मप्रकारतायामन्योत्कटीयाप्रामाण्यज्ञानसमाना ५

धिवरणतद्दीयधूमप्रकारकज्ञाननिरूपितत्वसंबंधेनतत्वेनतदुदितोपदर्शितसंबंधावच्छिन्नप्रति
योगिताकाप्रामाण्यज्ञानाभावस्यतज्ज्ञानत्वेनकारणाभावात्॥ एवंचावच्छेदकव्याप्यत्वावच्छिन्नत्व
नि स्वरूपप्रज्ञाननिरूपितत्वोभयसंबंधेनएवैतत्वावच्छिन्नविशेष्यतानिरूपिताभावप्रकारतानिरू
पितव्याप्यत्वावच्छिन्नप्रतियोगितानिरूपकत्वावच्छिन्नप्रकारताविशिष्टंयत्तद्भिन्नत्वमनुमितिमितिजनक
तावच्छेदकमतधूमप्रकारतायानिवेशपवह्निव्याप्यो धूमो वह्निव्याप्याभावानन्यवैतोधूमवान्
तिज्ञानद्वयकालेऽनुमित्युपपादनमपिमीमांसकानामनालोचनाविजृंभितमेवापतोज्ञानमेदेन
विषयतामेदानंगीकारात्‌दृशोनयेवह्निव्याप्यप्रकारतायांउपदर्शितोभयसंबंधेनसंबंधीयतथा
विधवह्निव्याप्यप्रकारताविशिष्टत्वेवह्निव्याप्यधूमवान्नवैतदृतिविशिष्टपरामर्शोदपिपर्वतोवह्नि
मानित्यनुमित्यनुपपत्तिरितिनवीनपरिशीलितःपंथाः॥ एवंतादृशानुमितिंधूमत्वावच्छिन्नाविशे मति
ष्यकव्याप्तिज्ञानधूमप्रकारकपर्वतज्ञानयोर्हेतुतावादिनयेवह्निव्याप्यवानितिसारपरामर्शादपि
अनुमित्यपलापापत्तेः॥तादृशीधूमत्वावच्छिन्नविशेष्यकव्याप्तिज्ञानादेरभावात्कारणाभावेना
नुमित्युत्पत्तेरसंभवात्॥अपपत्रतथाविधपरामर्शोत्तरंसामग्रीबलात्‌वह्निव्याप्यधूम
वान्पर्वतइतिपरामर्श३ उत्पद्यतेतत्तैवतथाविधानुमितिःस्वीक्रियतेयत्रतु३ उपदर्शितपरामर्श

६

पर्श्रीतरं न वह्निव्याप्यधूमवान्पर्वत इति ज्ञानं॥ तत्रमानांगीक्रियते इति चेत् तथापि मीमांसकमते प्रदर्शितदूष
णं निराबाधमेव॥ एवं तन्मते हेतुतावच्छेदकभेदेनानुमितिप्रामाण्ययोः कार्यकारणभावप्रयुक्तगौ
रवं दुष्परिहरमेव॥ नैय्यायिकनये पर्वतोद्देश्यकवह्निविधेयकानुमितिं प्रति साध्याभाववदवृत्तित्वरूप
व्याप्तिविशिष्टप्रकारकपर्वतविशेष्यकनिर्णयत्वेन हेतुत्वकल्पने हेतुतावच्छेदकभेदेन कार्यकारणभाव
रप्रयुक्तगौरववार्त्ता॥ न चानुमितिं प्रति हेतुतावच्छेदकविषयता ~~[illegible]~~ मेन मानिवेशस्य तेन रू
पेण हेतुत्वादि कल्पने निष्प्रयत्वादिति वैचनमराबाध्यमिति वाच्यं॥ तन्निवेशे च नोपायस्य नवी
नमतविवेचनावसरे विचारांतरे दर्शितत्वात्॥ न च मीमांसकमतेपि हेतुतावच्छेदकविषयता
मनिवेश्य स्वीयव्याप्तिप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपर्वतत्वा
वच्छिन्नविशेष्यताकत्वस्य समिनाधिकरण्यकालिकविशेषणतेतत्रितयसंबंधेन ज्ञानविशि
ष्टज्ञानत्वेन हेतुत्वं अनुमितिं प्रति कल्प्यते तथा च तन्मतेपि न हेतुतावच्छेदकभेदेन कार्यकारण
भावभेदप्रयुक्तगौरवावकाश इति वाच्यं॥ तथापि तादृशकारणतावच्छेदककोटौ तादृशत्रितयसंबंधघटि
केशेन गौरवस्य केनाप्युपायेनातिवार्यत्वात्॥ व्याप्यतावच्छेदकानुमितिं प्रति वह्निव्याप्यधूमः धूमवा
न्पर्वत इति ज्ञाने ~~[illegible]~~ हेतुत्वं नाधिकं किंतु पर्वतो धूमाभाववान्स्यादित्यापत्ति॥

प्रतिपर्वतो धूमवान्वह्नित्वात्साध्यव्यतिरेकनिरूपितस्वहेतुत्वेनावच्छिन्नीयेतन्नैववकार्यतावच्छेदककोटौ सा
२८ प्रतित्वनिवेशात् अव्यवहितोत्तरत्वसंबंधेन धूमसमवाकारके पर्वतावित्तेव्यव [redacted]
धीकारणताभावः कल्प्यते । एवं च वह्निव्याप्यमान्वनास्पाद्धूम इत्यापत्ति प्रतिधूमो वह्निव्या
प्य इत्यापाद्यव्यतिरेकनिरूपितस्वहेतुत्वेनावच्छिन्नीयेतन्नैवकार्यतावच्छेदककोटौ गमापत्तित्वप्र
निवेशस्त्वाव्यवहितोत्तरत्वोत्पत्तिकत्वसंबंधेन वह्निव्याप्यो धूम इत्याद्दशकानव
त्वेनिवेशापि कार्यतावच्छेदकरणताभावः कल्प्यते । न चैतत्र अव्यवहितोत्तरत्वादिसंबंधनिवेशे गौर
वात्तदपेक्षया ज्ञापत्तित्वादेरेवानवेशनोचितत्वमिति वाच्यं । तथापि विधापत्ति प्रतिधूमवा
न्यवेत इति ज्ञानवत्त्व धूमाभाववान्यवेत इति ज्ञानस्यापि हेतुत्वापातयोः परस्परव्यभि
चारवारणाय कार्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशानस्यावश्यकतयात्मा प
त्तित्वनिवेशस्य वोननाभावात् । तथा च रमतकार्यकारणभावेनैवतथापातिविधातुमिति
प्रतिताद्दशज्ञानेन ऊपस्यहेतुतानिवोलात् । नस्य च तत्रकाषिकारणभाव प्रयुक्तगौरवं मीमां
सकमते इति चेन्मैवं । उपदर्शितापत्तिप्रतिधूमवान्यवेत इति ज्ञानवत्त्वादि धूमाभावान्यव
वान्यवेत इति ज्ञानानामपि हेतुत्वकल्प्यते न देवतयोः परस्परव्यभिचारवारणाय का

ग

यैतावच्छेदकोक्त वच्छिन्नत्वनिवेशस्यावश्यकतया उपादर्शितायुक्तिः कं भवन्तितदेव न
तथाहि धूपत्तिं प्रतिधूमाभाववान्वेत इत्यादिज्ञानस्य हेतुत्वकल्पने गौरवात् लाघवाद्
मत्वावच्छिन्नप्रकारताशालिज्ञानत्वेनैव हेतुत्वं कल्पनीयं तथा च कार्यतास्थले प्रकार्यतावच्छेदको
पावच्छिन्नत्वनिवेशः कर्तव्यः नित्वेशेन प्रयुक्तलाघवसंभवनेति ॥ यदि चैतादृशो मयपक्षो
गान्वयव्यतिरेकबलादपत्तिं प्रति तथाविधोमयक्षेपेण हेतुत्वकल्पने गौरवं लाघवादिन
व्याप्तिः यतो नेव्याप्ति न मतेपि वह्निव्याप्यधूमवान्पर्वतादित्यापत्तिं प्रति वह्निव्याप्यवान्पर्व
त इत्यादि व्यतिरेकनिर्णयत्वेनहेतुत्वे कल्पनीये स्वाव्यवहितोत्तरत्वसम्बन्धेन लोत्पत्ति वह्न्यादि
मंवेधे वह्निव्याप्यवान्पर्वत इति निर्णयवेशिवेशपत्यापत्तित्वमपि वेशस्य लोमकार्यकारण
भावेनैवानुमितिं प्रति विशिष्टपरामर्शहेतुत्वनिर्वाहेण गौरवानवकाशो लाघवानवकाश
ध्यातिर्व्यतितथाहि अनुमितिं प्रतिविशिष्टपरामर्शत्वेन हेतुत्वे यत्र धूमवान्पर्वत इति ता *वह्निव्याप्योधूम*
न दधूपमालयं मध्यचापत्तिजनकलागारलोंतरेनाशितत्रानुमित्यापत्तिमनुमिति मनतेन
वच्छेदकको दोतत्तेद्वपत्तित्वावच्छिन्नप्रतियोगिताकभेदत्वेन तत्तव्यक्तित्वान्यमेदान्वे
दथा: नैव्याप्तिन मते तु तत्रविशिष्टपरामर्शाघमारणाभावेनैवानुमित्यापत्तिवारणसंभव

वेनानुमितिजनकतावच्छेदककोटौ तस्याप्रवेशान्निवेश्यंत इति लाघवं स्फुटमेव ॥ एवं मीमांसकमतेऽनु
मितिं प्रति तादृशज्ञानहेतुतायाः क्लृप्तत्वेन तेनैव हेतुः पर्वतो वह्निमानित्यनुमितिं प्रति हेतुतावच्छेदकभेदे
न सामग्रीव्याप्तेर्भिन्नताया आवश्यकत्वेनापि गौरवं गगनवत्तयाविधानुमितिं प्रति सामग्रीव्याप्तेः
स्वीयव्याप्तिप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नावि
७ शेष्यतानिरूपकत्वसंबंधेन ज्ञाने विशिष्टं यज्ज्ञानं तस्यानिवेशनीयतया गौरवानवकाश इति दिक् ॥
सामग्रीव्याप्तिमध्ये कारणतावच्छेदकावच्छिन्नस्यैव निवेशनीयत्वनियमात् ॥ अन्यथा साम
ग्रीव्याप्तेरेव सर्वत्र फलनिर्वाहे कार्यकारणभावमात्रविलोपापत्तेः ॥ केचित्तु पर्वतो वह्निमानि
त्यनुमितिं प्रति वह्निव्याप्यो धूमः धूमवान् पर्वत इति ज्ञानद्वयं हेतुः तावादि मीमांसकमते धूमवा
न्पर्वतो वह्निव्याप्यधूमसमानाधिकरणवह्निमत्पर्वतकालीनालोकवानित्याद्यनुमितिसामग्र्या
मनंतघटपटादिप्रत्यक्षं प्रति स्वतंत्रप्रतिबंधकत्वाकल्पनेन लाघवं संभवेत् तन्मते पर्वतो वह्निम
ानित्यनुमितिसामग्र्या आवश्यकत्वेन तत्प्रतिबंधकतयैवानंतघटादिप्रत्यक्षानुत्पत्तिनिर्वाहाद्
नैयायिकैस्तु घटपटादिप्रत्यक्षं प्रति तथाविधानुमितिसामग्र्याः स्वातंत्र्येण प्रतिबंधकत्वमवश्यं

ला.न.द.

८

कल्पनीयं ॥ तन्मते पर्वतो वह्निमानिति तनुमितिसामग्र्या वह्निव्याप्यप्रकारकपर्वतविशेष्यकनिर्णयघ
टितायास्तत्राभावेन तादृशसामग्रीप्रतिबंधकतया निर्वाहसंभवादिति ॥ ज्ञानद्वयहेतुतावा
दिमतमेव सम्यगित्याहुः ॥ तदसत् ॥ ज्ञानद्वयप्रयोजकपक्षमंगीकर्तॄणां मीमांसकानां मते सामग्री प्रति
बंध्यप्रतिबंधकभावकल्पनप्रयुक्तलाघवस्यासंभवदुक्तिकतापत्तेः ॥ न च तथापि ज्ञानद्वयप्रयोज
कपक्षानंगीकर्तॄणां नैयायिकानां मते उपदर्शितलाघवसंभवात् तेनैव तत्पं ज्ञानद्वयहेतुत्वं नक
ल्प्यत इति वाच्यं ॥ तादृशज्ञानद्वयहेतुत्वस्य पूर्वदर्शितानुपपत्तिगलग्रस्तत्वेनातिदुःसाध्यत्वादि
ति ॥ यत्तु घटादिप्रत्यक्षं प्रति भिन्नविषयकानुमितिसामग्र्याः दर्शनाच्चेत्किमिष्यप्रतिबध्यप्रतिबंध
कभावः कल्प्यते तद्वत् पूर्वदर्शितरीत्या सामग्रीप्रतिबध्यप्रतिबंधकभावकल्पनानुदितप्रयुक्तला
घवं संभवति मीमांसकमते तदेवानं किंतु प्रत्यक्षं प्रति स्ववृत्तिजातियोगित्वसंबंधेन वृत्तिविरो
ध्योऽनुमितिमात्रभावत्वेन प्रतिबंधकत्वे कल्प्यते लाघवात् कारणकलापात्मकसामग्री
ग्रीप्रतिबंधकत्वकल्पने तु विषयभेदभिन्नसामग्रीणां भेदेन तत्प्रतिबंधकत्वकल्पने
गौरवस्य स्फुटत्वात् ॥ तत्र च कल्पे घटं गौरवं चेति । तदसत्त्वं तन्मतम् ॥ तथा सति यत्र वह्नि

प्रत्यक्षानुमितिसामग्री एवं घटस्यापीति तत्र ज्ञानद्वययौगपद्यापत्तेः। तुल्ययुक्तसामानेवि
षये प्रत्यक्षसामग्रीजानुमितिसामग्र्योर्यौगपद्येऽनुमितेर्वीरणायानुमितिं प्रति स्वद्व दि
प्रतियोगिकत्वसंबंध्येन व्यक्ति विशिष्ट प्रत्यक्षप्रागभावस्यापि प्रतिबंधकत्वेन उपदर्शि
तसामग्र्या वस्तुद्वयसंब[illegible]लनदशायां कस्यापि फलस्याभावेनोत्पदर्शितविशिष्टप्रा
गभावद्वयाभावसत्वात् प्रत्यक्षानुमित्योर्यौगपद्यं बुध्यस्वाद्विचारयितुमशक्यमिति
सर्वं चतुरस्रम्॥ श्रीवीरेश्वराय नमः॥ ज्ञानद्वयकारणताविचारोऽन्ततः॥ वंसीधरेण

८

ज्ञानद

७

न्याय

तेरानीतनस्वविषेषणत्वज्ञाप्रातिसंध्यानेवलवदनिष्टाननुबंधिविषयकेजन्यकार्यताज्ञानेप्रवृत्तिं प्रतिकारणं
अहमिदानीतनकृतिसाध्यसंध्यावंदनःद्विजातित्वेसतिविहितसंध्याकालीनत्वेचादिमत्वादिसमुमानेद्वि
जातित्वेसतिविहितसाध्यकालीनत्वेचादिमान्सतकालीनकृतिसाध्यसंध्यावंदनमिति सामा
न्यमुखव्याप्तेः। अभिचरमहीनं चेत्रिभिः [illegible] ध्येको हति।

ज्ञानद कार्यता विचार

२१०

८